IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# निरुक्तानुसारेण मन्त्राणां त्रैविध्यम्

सुमननस्करः

शोधच्छात्रः

नवनालन्दामहाविहारः(सम-विश्वविद्यालयः),

भारतसर्वकारस्य संस्कृतिमंत्रालयाधीनः,

नालन्दा,

बिहारः - ८ ० ३ १ १ १

**शोधसारः** - वेदार्थवोधकमभिधानग्रन्थं भवति निरुक्तम्। निरुक्तं भवति वैदिकशब्दकोषं मन्त्रभाष्यञ्च। 'निघन्टु' इति ग्रन्थं भवति पृथिव्याः प्राचीनतममभिधानग्रन्थम्। 'निघन्टु' इत्यस्मिन् ग्रन्थस्य भाष्यग्रन्थं भवति यास्काचार्येण विरचितेन निरुक्तमिति ग्रन्थम्। निरुक्तमिति ग्रन्थं नैघन्टुकं, नैगमं दैवतञ्चेति काण्डत्रये विभक्तं भवति। तत्र दैवतकाण्डे मन्त्राणां देवतानिर्णयविषये निर्देशितं यत् कामयमानः ऋषिः कामनासिद्धेः यस्यां देवतायां कृते स्तुतिं प्रयोगं करिष्यति, सः मन्त्रः तत् दैवतः भविष्यति।

ऋचाः त्रिविधाः भवन्ति। यथा- परोक्षकृताः, प्रत्यक्षकृताः आध्यात्मिक्यश्च। त्रिविधां ऋचां मध्ये यस्मिन् ऋचे सुवन्तपदं नामपदं वा सर्वप्रकारकं विभक्तियुक्तं भवति अर्थात् प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी सम्बोधनं चेति सप्त विभक्तेः मध्ये किमपि एकं विभक्तियुक्तं भवति परन्तु आख्यातपदं क्रियापदं वा केवलं प्रथमपुरुषे प्रयोगं भवति ते ऋचाः परोक्षकृताः भवन्ति।

यस्मिन् ऋचे तिङन्तपदमाख्यातपदं वा मध्यमपुरुषे प्रयोगं भवति सुवन्तपदं च त्वमिति सर्वनामपदयुक्तं भवति तादृशि ऋचाः प्रत्यक्षकृताः इत्याख्यायन्ते। परन्तु यत्र मध्यमपुरुषस्य प्रयोगोऽस्ति तत्र त्वमिति पदस्य अध्याहारं करणीयम्। यस्मिन् ऋचे स्तोता प्रत्यक्षकृतः अर्थात् मध्यमपुरुषस्येकवचने प्रयुक्तमस्ति परन्तु स्तोतव्यः देवता परोक्षकृतः – एवम् ऋचः अपि परोक्षकृतः रूपेणाख्यायते।

यस्मिन् ऋचाः उत्तमपुरुषयोगाः भवन्ति अहमिति सर्वनाम्ना युक्तं च भवन्ति ते ऋचाः आध्यात्मिकी रूपेणाख्यायन्ते। परन्तु यदि उत्तमपुरुषस्याख्यातस्य प्रयोगं स्यात् तर्हि 'अस्मद्' इति शब्दस्य प्रथमा विभक्त्याः पदमध्याहारं करणीयम्। अपि च यदि 'अस्मद्' शब्दस्य प्रथमा विभक्त्याः पदस्य प्रयोगं स्यात् तर्हि उत्तमपुरुषस्याख्यातपदस्याध्याहारं करणीयम्।

**विषयसूचकशब्दाः :-** निरुक्तम्, ऋचाः, परोक्षकृताः, प्रत्यक्षकृताः, आध्यात्मिकी।

**भूमिका –** सम्यक् रूपेण वेदपाठकरणाय, सम्यकर्थवोधाय, सम्यक् विनियोगस्य सहायकशास्त्रं च वेदाङ्गमिति नाम्ना आख्यायते। वेदाङ्गः षड्विधाः भवन्ति – शिक्षा, कल्पं, व्याकरणं, निरुक्तं, छन्दः ज्योतिषामिति चेति। प्रसङ्गेऽस्मिन् पाणिनीयशिक्षायां निर्देशितं यत् –

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।"[1]

"शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।

तस्मात् साङ्गमधीत्यैव व्रह्मलोके महीयते।।"[2]

निरुक्त-वेदाङ्गं भवति वेदपुरुषस्य श्रोत्रस्वरूपम्। निरुक्तं भवति वेदार्थवोधकमभिधानग्रन्थम्। वैदिकशब्दकोषं मन्त्रभाष्यञ्च भवति निरुक्तम्। पृथिव्याः प्राचीनतममभिधानग्रन्थं भवति निघन्टु इति ग्रन्थम्। निघन्टु इत्यस्मिन् ग्रन्थस्य भाष्यग्रन्थं भवति यास्काचार्येण विरचितेन निरुक्तमिति ग्रन्थम्। ग्रन्थोऽयं नैघन्टुकं, नैगमं दैवतञ्चेति काण्डत्रये विभक्तमस्ति। नैघन्टुककाण्डमध्यायत्रये विभक्तमस्ति। नैगमकाण्डं अध्यायचतुष्टयं समन्वितम्। दैवतकाण्डं तु पञ्च-अध्यायाः समन्विताः भवन्ति। दैवतप्रकरणस्य ज्ञानं विना देवता पदार्थस्य सम्यक् ज्ञानं न भवति। अतः दैवतकाण्डस्य प्रागेव यास्काचार्येण निर्देशितं यत् - "अथातो दैवतम्"[3] इति। देवतापरिज्ञानस्योपरि निर्भरशीलमस्ति सर्वपुरुषार्थसिद्धिः। अतः दैवतप्रकरणस्य व्याख्यानं प्रयोजनीयम्। मन्त्राणां देवतानिर्णयप्रसङ्गे यास्काचार्येणोक्तम् - "यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति"[4] इति।

---

[1] पाणिनीय शिक्षा / ४१

[2] पाणिनीय शिक्षा / ४२

[3] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / प्रथमपरिच्छेदः / १

[4] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / प्रथमपरिच्छेदः / ४

अर्थात् ऋषिः किमपि पदार्थस्य कामनायां यस्मिन् देवतायां समीपे कामनासिद्धेः स्तुतिं प्रयोगं करोति तत् मन्त्रं तस्मिन् देवतायाः कृते भवति।

देवतायां कृते उच्चारिताः मन्त्राः त्रिविधाः भवन्ति। ते यथा – परोक्षकृताः, प्रत्यक्षकृता आध्यात्मिकी चेति। अतः निरुक्ते उक्तम् - "तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्च"[5] इति। वेदेषु निर्देशिताः ऋचाः एवं रूपेण त्रिविधाः भवन्ति। अतः त्रिविधाः ऋचाः विषये निम्ने विस्तारितालोचना प्रदीयते –

**परोक्षकृताः** – यस्मिन् ऋचे सुवन्तपदं नामपदं वा सर्वप्रकारकं विभक्तियुक्तं भवति अर्थात् प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी सम्वोधनञ्चेति सप्त विभक्तिनां मध्ये किमपि एकं विभक्तियुक्तं भवति परन्तु आख्यातपदं क्रियापदं वा केवलं प्रथमपुरुषे एव प्रयोगं भवति ताः ऋचाः परोक्षकृताः भवन्ति। प्रसङ्गेऽस्मिन् यास्काचार्येण निरुक्ते उल्लिखितं यत् – "तत्र परोक्षकृताः सर्व्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथम पुरुषैश्चाख्यातस्य"[6] इति। तत्रोदाहरणं यथा –

"इन्द्रो दिव इन्द्र ईशे पृथिव्याः"[7] इति।

अर्थात्, इन्द्रदेवः द्युलोकस्योपरि आधिपत्यं करोति, पृथिव्यामुपरि अपि आधिपत्यं विस्तारयति। मन्त्रेऽस्मिन् वैश्वामित्र-ऋषिः त्रिष्टुप् छन्दश्चेति। अत्र 'इन्द्र' इति सुवन्तपदं प्रथमा विभक्तियुक्तं, 'ईशे' इति तिङन्तपदं च प्रथमपुरुषस्य एकवचने प्रयुक्तमभवत्। अतः मन्त्रोऽस्मिन् परोक्षकृतः। अपि च –

"इन्द्रमिद्गाथिनो बृहत्"[8]।।

अर्थात्, सामगायिणः वृहदिति सामेन इन्द्रं स्तुतिं प्रदर्शयति। अत्र वैश्वामित्र-मधुच्छन्दा ऋषिः गायत्री छन्दश्चेति।

"इन्द्रेणैते तृत्सवो वेविषाणा"[9]।।

अर्थात्, इन्द्रकर्तृकेन एते दारयितव्यः मघसमूहः पुनः पुनः व्याप्यमानः भवति।

---

[5] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / प्रथमपरिच्छेदः / ५

[6] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / प्रथमपरिच्छेदः / ६

[7] ऋ. सं. ८/४/१५/५

[8] ऋ. सं. १/१/१३/१

[9] ऋ. ७/१८/१५

“इन्द्राय साम गायत”[10]।।

अर्थात्, हे उद्गातारः इन्द्रस्य उद्देश्येन सामानि गायन्तु। मन्त्रेऽस्मिन् नृमेधस ऋषिः उष्णिक् छन्दश्च।

“नेन्द्रादृते पवते धाम किञ्चन“[11]।।

अर्थात्, सोमः इन्द्रं विना प्रातःसवनादीनां सोमसवनस्थानं न गच्छति। मन्त्रेऽस्मिन् वैश्वामित्र-ऋषिः, पवमान-सोमः देवता, जगती छन्दश्चास्ति।

“इन्द्रस्य नु वीर्याणि प्रवोचम्”[12]।।

अर्थात्, (अहं) क्षिप्रः इन्द्रस्य वीरकर्माणि वर्णनां करिष्यामि। मन्त्रेऽस्मिन् आङ्गिरसस्य हिरण्यस्तूपस्येयमार्षं त्रिष्टुप छन्दश्च।

“इन्द्रे कामा अयंसत”[13]।।

अर्थात्, (हे स्तोतारः) ये दिव्याः कामाः सन्ति ये च पार्थिवाः कामाः सन्ति, ते सर्वाणि इन्द्रस्याधीनास्ति।

उपरि-निर्देशितानां मन्त्राणां सुवन्तपदानि यथाक्रमेण इन्द्रम्, इन्द्रेण, इन्द्राय, इन्द्रात्, इन्द्रस्य, इन्द्रे चेति द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी सप्तमी चेति विभक्तियुक्तं भवति। अतः नियमानुसारेण अत्र निर्देशिताः सर्वे मन्त्राः परोक्षकृताः।

**प्रत्यक्षकृताः** – यस्मिन् ऋचे तिङन्तपदमाख्यातपदं वा मध्यमपुरुषे प्रयोगं भवति सुवन्तपदं च त्वमिति सर्वनामपदयुक्तं भवति ताः ऋचाः प्रत्यक्षकृताः इत्याख्यायन्ते। प्रसङ्गेऽस्मिन् यास्काचार्येण निरुक्ते निर्देशितं यत् - “अथ प्रत्यक्षकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना।।”[14] परन्तु यत्र मध्यमपुरुषष्य प्रयोगोऽस्ति तत्र त्वमिति पदस्य अध्याहारं करणीयम्। प्रसङ्गेऽस्मिन् वृत्तिकारेण दुर्गाचार्येण उक्तं यत् - “यत्र त्वमित्येवं श्रुयते तत्राविद्यमानोऽपि मध्यमः पुरुषोऽध्याहार्य्यः, यत्र तु मध्यमः पुरुषः श्रुय़ते तत्राविद्यमानपि त्वम्”[15]।। तत्रोदाहरणं यथा –

---

[10] ऋ. ८/९८/१

[11] ऋ. ९/६९/६

[12] ऋ. ३/३२/१

[13] ऋ. ७/२/१

[14] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / द्वितीय-परिच्छेदः / ८

[15] दुर्गाचार्यवृत्तिः

"त्वमिन्द्र बलादधि"[16] इति।

अर्थात्, हे इन्द्रः, त्वं बलादधिजातोऽसि।

"वि न इन्द्र मृधो जहि"[17] इति।

अर्थात्, हे इन्द्रः त्वमस्माकं संग्रामकारिणः शत्रून् विनाशं करोतु। मन्त्रेऽस्मिन् भरद्वाज-ऋषिः अनुष्टुभछन्दश्च।

अत्र प्रथममन्त्रे त्वमिति पदस्य उल्लेखमस्ति। अतः मन्त्रोऽस्मिन् प्रत्यक्षकृतः। द्वितीयमन्त्रे 'जहि' इति क्रियापदस्य मध्यमपुरुषे प्रयोगमस्ति। अत्र त्वमिति पदं नास्ति। अतः अत्र त्वमिति पदस्य अध्याहारं करणीयम्। अतः मन्त्रोऽस्मिन् प्रत्यक्षकृतः।

यस्मिन् ऋचे स्तोता प्रत्यक्षकृतः अर्थात् मध्यमपुरुषस्येकवचने प्रयुक्तमस्ति परन्तु स्तोतव्यः देवता परोक्षकृतः – एवं ऋचः अपि परोक्षकृतः रूपेणाख्यायते। प्रसङ्गेऽस्मिन् निरुक्ताकारेण यास्काचार्येणोक्तं यत् - "अथापि प्रत्यक्षकृताः स्तोतारो भवन्ति परोक्षकृतानि स्तोतव्यानि"[18] इति। विषयेऽस्मिन् वृत्तिकारेण दुर्गाचार्येणोक्तं यत् - "स्तोतव्यानि तु यानि देवतान्तराणि तानि परोक्षकृताभिसम्भन्धीनि"[19]। तत्रोदाहरणं यथा –

"मा चिदन्यद्विशंसत"[20] इति।

अर्थात्, हे स्तोतारः यूयमन्यत् किञ्चिदपि मा स्तुतिभिरुच्चारयत। केवलमिन्द्रमित् स्तोत।

"कण्वा अभिप्रगायत"[21] इति।

अर्थात्, हे कण्वगोत्रोत्पन्नः मेधाविनः ऋत्विजः यूयं मरुद्देवताकं बलमभितः प्रकर्षेण स्तुध्वम्।

"उपप्रेत कुशिकाश्चेतयध्वम्"[22] इत्यादिनी।

अर्थात्, हे कुशिकगोत्रोत्पन्नः ऋत्विजः यूयमस्याश्वस्य समीपं गच्छत। विक्षिप्तचित्तं मा भवन्तु।

---

16 ऋ. १०/१५३/२

17 ऋ. १०/१५२/४

18 निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / द्वितीय-परिच्छेदः / १०

19 दुर्गाचार्य्यवृत्तिः

20 ऋ. ८/१/१

21 ऋ. १/३७/१

22 ऋ. ३/५३/११

**आध्यात्मिकी –** आध्यात्मिकी मन्त्राणां स्वरूपविषये यास्काचार्येणोक्तं यत् - "अथाध्यात्मिक्य उत्तमपुरुषयोगा अहमिति चैतेन सर्व्वनाम्ना"[23] इति। अर्थात् यस्मिन् ऋचाः उत्तमपुरुषयोगाः भवन्ति अहमिति सर्वनाम्ना युक्तं च भवन्ति ते ऋचाः आधात्मिकी रूपेण आख्यायन्ते। परन्तु यदि उत्तमपुरुषस्याख्यातस्य प्रयोगं स्यात् तर्हि 'अस्मद्' इति शब्दस्य प्रथमा विभक्त्याः पदमध्याहारं करणीयम्। अपि च यदि 'अस्मद्' इति शब्दस्य प्रथमा विभक्त्याः पदस्य प्रयोगं स्यात् तर्हि उत्तमपुरुषस्य आख्यातपदस्याध्याहारं करणीयम्। तत्रोदाहरणं यथा –

"यथैतदिन्द्रो वैकुण्ठो लवसूक्तं वागाम्भृणीयमिति"[24]।।

अर्थात्, यथा एतदुदाहरणत्रयमाध्यात्मिकम् – इन्द्रः वैकुण्ठः सूक्तं, लवसूक्तमम्भृण ऋषेः कन्या वाग्देव्याः सूक्तञ्चेति।

"अहं रुद्रेभिर्वसुभिश्चरामि.....।।"[25] इत्यादिनी।

अर्थात्, अहं (परमात्मा देवता) रुद्रेभिः वसुभिः सह विचरणं करोमि।

**उद्भूताः प्रश्नाः –** आलोचनायाः परं कानिचन प्रश्नाः उद्घाटयन्ति। ते यथा –

(१) परोक्षकृतः प्रत्यक्षकृतः आध्यात्मिकी चेति त्रिविधं मन्त्रं विहाय किमपि मन्त्रमस्ति न वा ?

(२) त्रिविधानां मन्त्राणां मध्ये कस्मिन् श्रेण्यां मन्त्राणां संख्या अधिकमस्ति कस्मिन् श्रेण्यां मन्त्राणां संख्या स्वल्पञ्चेति ?

(३) मन्त्रः कः ? केन प्रकारेण ऋषयः मन्त्रदर्शनं कुर्वन्ति ?

(४) वेदे एवं विधाः कानिचन् मन्त्राः सन्ति यत्र अनादिष्टदेवताः अर्थात् यत्र ऋषिणाः दवताविषये स्पष्टतया किञ्चिदपि न निर्देशिताः। अतः तन्मन्त्रस्य देवतानिर्णयः केन प्रकारेण सम्भवति ?

(५) यतः ऋचाः देवतायामुद्देश्येन प्रयुक्तं भवति अतः निरुक्तानुसारेण देवता कतिविधं भवति के च ते ?

---

[23] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / द्वितीय-परिच्छेदः / १२

[24] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / द्वितीय-परिच्छेदः / १३

[25] ऋ. १०/१२५/१

**साधिताः शोधकार्याणि –** निरुक्तमधिकृत्य वहुविधानि शोधकार्याणि विविधविश्वविद्यालये विविधैः शोधच्छात्रैः कृतानि। अतः उपलब्धानि शोधकार्याणि यथा –

(१) A critical study of some aspects of Nirukta, Burdwan University, 1998.

(२) Linguistic speculations in Yaska's Nirukta, Jadavpur University, 1985.

(३) निरुक्त में प्रतिपादित अन्तरिक्षस्थानीय देवताओं का समीक्षात्मक अध्ययन, काशी हिन्दु विश्वविद्यालय, २०२२.

(४) यास्कीय निरुक्त पर दुर्गाचार्य एवं स्कन्दस्वामी की टिकाओं का तुलनात्मक अध्ययन, गौहाती यूनिवर्सिटी, १९९२.

**उद्धृत-प्रश्नानां समाधानम् –** परोक्षकृतः, प्रत्यक्षकृतः आध्यात्मिकी चेति त्रिविधं मन्त्रं विहाय एवं क्वचित् मन्त्रमस्ति यत्र न आशिर्वादः, केवलं स्तुतिरेव भवति। तत्रोदाहरणं यथा –

"इन्द्रस्य नु वीर्य्याणि प्रवोचम्"[26] इति।

अथापि क्वचित् ऋचाः एवं सन्ति यत्र नस्ति स्तुतिः, तत्रास्ति आशीर्व्वादः, प्रार्थना कामना वा। तत्रोदाहरणं यथा –

"सुचक्षा अहमक्षीभ्यां सुवर्चा मुखेन सुश्रुत् कर्णाभ्यां भूयासम्"[27] इति।

अपि च क्वचित् मन्त्राः दृष्टाः भवन्ति यत्रास्ति शपथाः अभिशापश्च। प्रसङ्गेऽस्मिन् उदाहरणं यथा –

"अद्या मुरीय यदि यतुधानो अस्मि"[28] इति।

अपि च क्वचित् मन्त्रे कस्यचित् भावस्य कथनेच्छास्ति। विषयेऽस्मिन् उदाहरणं यथा –

"न मृत्युरासीदमृतं न तर्हि"[29] इति।

अथापि क्वचित् मन्त्रे कस्माच्चित् भावात् परिदेवना अस्ति। विषयेऽस्मिन् उदाहरणं यथा –

"सुदेवो अद्य प्रपतेदनावृत्"[30] इति।

---

[26] ऋ. १/३२/१

[27] मा. गृ. सू. १/९/२५

[28] ऋ. ७/१०४/१५

[29] ऋ. १०/१२९/२

[30] ऋ. १०/९५/१४

अपि च क्वचित् मन्त्रे अस्ति निन्दा प्रशंसा च। प्रसङ्गेऽस्मिन् उदाहरणं यथा –

"केवलाघो भवति केवलादी"[31] इति।

•• वेदे वहवः परोक्षकृताः मन्त्राः सन्ति, प्रत्यक्षकृताः मन्त्रा अपि वहवः सन्ति। परन्तु क्वचिच्च अल्पशः आध्यात्मिकाः मन्त्राः लक्ष्यन्ते। प्रसङ्गेऽस्मिन् यास्काचार्येण तस्य निरुक्तमिति ग्रन्थे उल्लिखितं यत् –

"परोक्षकृताः प्रत्यक्षकृताश्च मन्त्रा भूयिष्ठा अल्पश आध्यात्मिकाः"[32] इति।

••• ज्ञानार्थकः मन् धातोः मन्त्रशब्दं निष्पन्नं भवति। यास्काचार्येण उक्तं यत् – "मन्त्राः मननात्"[33] इति। देवता परिज्ञानं भवति मन्त्रादेव। देवतायाः भक्तिसाहचर्यं कर्माणि च इत्यादिनी विषयाणि मन्त्रादेव परिज्ञातं भवति। मन्त्राः नित्य-विद्यमानाः। ऋषयस्तु मन्त्रद्रष्टारः, न तु स्रष्टारः। वहुविधाभिप्रायेण अर्थात् निन्दा, हर्षः, शोकः प्रशंसा चेति मन्त्राभिव्यक्तेः कारणानि यदा उपस्तितानि भवन्ति भवन्ति तदा ऋषीणां मन्त्रदर्शनं भवति। प्रसङ्गेऽस्मिन् यास्काचार्येण तस्य निरुक्तमिति ग्रन्थे निर्देशितं यत् –

"एवमुच्चावचैरभिप्रायैर्ऋषीणां मन्त्रदृष्टयो भवन्ति।"[34]

अस्मिन् विषये वृत्तिकारेण दुर्गाचार्येणोक्तं यत् – "विद्यमानानामेव हि मन्त्राणामृषयो येन केनचिन्निमित्तेन निदानभूतेन निन्दाहर्षशोकप्रशंसादिना मन्त्राणां द्रष्टारो भवन्ति न तु कर्तार इत्यभिप्रायः।"[35]

•••• ये मन्त्राः अनादिष्टदेवताः तेषु देवतोपपरीक्षायाः पद्धतिं भवति – स यज्ञो वा यज्ञाङ्ग वा यद्देवतः ते ऋचाः तद्देवताः भवन्ति। प्रसङ्गेऽसमिन् निरुक्ताकारेण यास्काचार्येण निर्देशितं यत् – "यद्देवतः यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति"[36]। अपि च याज्ञिकाः मन्यन्ते यत् यज्ञस्थलेषु प्रयुक्तोऽयं मन्त्राणां दवता भवति प्राजापति। प्रसङ्गेऽस्मिन् यास्काचार्यस्य मतं यथा – "अथान्यत्र

---

[31] ऋ. १०/११७/६

[32] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / तृतीय-परिच्छेदः / १

[33] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / द्वादश-परिच्छेदः / १

[34] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / तृतीय-परिच्छेदः / २०

[35] दुर्गाचार्य्यवृत्तिः

[36] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / चतुर्थ-परिच्छेदः / २

यज्ञात् प्राजापत्या इति याज्ञिकाः"[37]। अपि च अनादिष्टदेवताः मन्त्राणां देवता अग्निः वायुर्वा, कामदेवता स्यात्।

••••• निरुक्तमनुसारेण पृथिवीस्थानो, अन्तरिक्षस्थानः द्युस्थानः चेति तिस्रः देवताः भवन्ति। भूलोकः, द्युलोकः, अन्तरिक्षलोकः – एवं त्रिलोकं स्वीकृत्वा विश्वब्रह्माण्डं रचितमभवत्। यतः लोकानां संख्या अस्ति तिस्रः अतः देवतानां संख्या अस्ति तिस्रैव। तत्र पृथिवीस्थानीयः देवता अस्ति अग्निः, अन्तरिक्षस्थानीयः देवतास्ति इन्द्रः वायुर्वा, द्युस्थानीयः देवतास्ति सूर्यः। प्रसङ्गेऽस्मिन् यास्काचार्येणोक्तं यत् – "अग्निः पृथिवीस्थानो वायुर्वेन्द्रोवान्तरिक्षस्थानः सूर्य्यो द्युस्थानः"[38] इति।

**उपसंहारः –** निर्भुल वेद-पाठाय सम्यगर्थवोधाय च सहायकशास्त्रं भवति वेदाङ्गमिति। निरुक्तमिति वेदाङ्गं भवति वेदार्थवोधकमभिधानग्रन्थम्। पृथिव्याः प्राचीनतममभिधानग्रन्थं भवति निघन्टु। तत् निघन्टु-ग्रन्थस्य भाष्यग्रन्थं भवति यास्काचार्यस्य विरचितस्य निरुक्तमिति ग्रन्थम्। ग्रन्थोऽयं त्रिषु काण्डेषु विभक्ताः सन्ति। तृतीय तथा दैवतकाण्डे यास्काचार्येण निर्देशितं यत् – ऋचाः त्रिविधाः – परोक्षकृताः, प्रत्यक्षकृता आध्यात्मिक्यश्चेति। यस्य मन्त्रस्य सुवन्तपदं सर्वाणि विभक्तियुक्तानि भवन्ति, किन्तु तिङन्तपदं प्रथमपुरुषे प्रयोगं भवति तस्य मन्त्रस्य परोक्षकृतः रूपेनाख्यायते। अपि च यस्य मन्त्रस्य तिङन्तपदं मध्यमपुरुषे सुवन्तपदं च त्वमिति सर्वनामयुक्तं भवति तस्य मन्त्रस्य प्रत्यक्षकृतः रूपेनाख्यायते। पुनः यः मन्त्रः उत्तमपुरुषेण सहितः युक्तं भवति अहमिति च सर्वनाम्ना युक्तं भवति सः मन्त्रः आध्यात्मिकी रूपेनाख्यायते। परन्तु ये मन्त्राः अनादिष्टदेवताः तत् समस्यायां सः यज्ञो वा यज्ञाङ्गं वा यद्देवताः ऋचाः तद्देवताः भवन्ति।

**निर्वाचिताः ग्रन्थपञ्जी –**


(१) Thakur, Amareswara. "दैवत काण्ड," निरुक्तम्, Reprint, University of Calcutta, 2016, पृष्ठा-825-846.

(२) झा, मुकुन्द. "दैवताकाण्डम्," निरुक्तम्, पुनर्मुदित संस्करण, चौखम्बा संस्कृत प्रतिष्ठान, २००८, पृष्ठा-३३९-३५३

(३) मेधाचैतन्य, ब्रह्मचारी. "आध्यात्मिक निर्वचन," निरुक्तम्, प्रथम प्रकाश: नववर्ष, संस्कृत पुस्तक भाण्डार, 1424, पृष्ठा-206-308.


[37] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / चतुर्थ-परिच्छेदः / ३

[38] निरुक्तम् / दैवतकाण्डम् / सप्तमाध्यायः / पञ्चम-परिच्छेदः / २

(४) शर्मा, उमाशङ्कर. “सप्तम अध्याय” निरुक्तम्, पुनर्मुद्रित संस्करण, चौखम्बा विद्याभवन, २००५, पृष्ठा-२२४-२२८.

**अन्तर्जालः –**

(१) https://archive.org/stream/YprG_vaidik-rishi-drishti-samiksha-of-dr.-sundar-narayan-jha-prof.-ramesh-kumar-pandey-series-no.-5/Vaidik%20Rishi%20Drishti%20Samiksha%20of%20Dr.%20Sundar%20Narayan%20Jha%20-%20Prof.%20Ramesh%20Kumar%20Pandey%20Series%20No.%205_djvu.txt
(२) https://hi.wikipedia.org/wiki/%E0%A4%AE%E0%A4%A8%E0%A5%8D%E0%A4%A4%E0%A5%8D%E0%A4%B0
(३) https://sa.wikipedia.org/wiki/%E0%A4%A8%E0%A4%BF%E0%A4%B0%E0%A5%81%E0%A4%95%E0%A5%8D%E0%A4%A4%E0%A4%AE%E0%A5%8D
(४) https://www.jstor.org/stable/26546268
(५) https://www.quora.com/How-did-Yaskacharya-in-his-Nirukta-explain-the-Vedic-Mantras-at-three-levels-i-e-Adhibhautik-Adhidaivik-and-Adhyatmik?ch=15&oid=167369619&share=1142ec9a&target_type=question
(६)https://en.wikipedia.org/wiki/Nirukta
(७) https://www.ganeshaspeaks.com/spirituality/hinduism/six-vedangas/nirukta/
(८) https://vedah.com/blogs/mantras-of-rig-veda/yaska-and-brhad-devata-on-the-mantra
(९)https://www.templepurohit.com/nirukta/
(१०) https://www.wisdomlib.org/definition/mantra